# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – फलितज्योतिषम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – मानसागरी** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ ललाटपट्टे लिखिता विधात्रा षष्ठे दिने याऽक्षरमालिका च।
तां जन्मपत्रीं प्रकटीविधत्ते दीपो यथा वस्तु घनान्धकारे ॥

२ कुम्भलग्ने नरो जातोऽचलचिन्तोऽतिसौहृदः।
परदाररतो नित्यं मृदुकायो महासुखी ॥

३ रविजः षष्ठगश्चन्द्राज्जन्मकाले यदा भवेत्।
महाक्लेशी तथा कष्टी आयुर्हीनो भवेन्नरः ॥

४ दिक्कालनखबाणेभदृङ्नखाः समयो दिशः।
मनवो राम वेदश्च मेषाद्यष्टोत्तरे शतम् ॥

**प्रश्नः** २ द्वादशयुगज्ञानं फलानि च निबन्धयत।

**प्रश्नः** ३ द्वादशराशिफलानि निबन्धयत।

**प्रश्नः** ४ चरखण्डज्ञानविधिं लिखत।

**प्रश्नः** ५ द्वादशभावेषु राहुविचारः क्रियताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ बुधार्ककुजजीवानां योगे सूत्रकरो नरः।
परदाररतः शूरो दुःखी चक्रधरो भवेत् ॥

२ रिपुभवनेश रिपुस्थे नीरूग्वैरी सुखीकृपणः।
न हि जन्मतोऽपि सीदति स्थान कुवासी नरो भवति ॥

३ तत्कालमित्रं तु निसर्गमित्रं द्वयं भवेत्तत्वधिमित्रसंज्ञम् ।
तथैव शत्रोरधिशत्रुसंज्ञमेकत्र शत्रुः समतामुपैति ॥

४ वाह्लीकदेशादरशूरसेनगन्धर्वगङ्गायमुनान्तरात्मान् ।
भुक्त्वा वनान्ते निधनं प्रयाति हंसोऽयमुक्तो मुनिभिः प्रमाणैः ॥

**प्रश्नः ७** चतुर्ग्रहसूर्यादियोगफलानि लिखत ।

**प्रश्नः ८** द्वादशभावस्थ सप्तमेशफलं लिखत ।

**प्रश्नः ९** षड्वर्गविचारः क्रियताम् ।

**प्रश्नः १०** पञ्चमहापुरुषयोगविचारः क्रियताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ कति संवत्सराणि भवन्ति ?
२ जयातिथयः काः ?
३ शनिवारायुः प्रमाणं किम् ?
४ प्रथमसंवत्सरनाम किम् ?
५ चन्द्राद् द्वादशगो भानुर्जन्मकाले यदा भवेत् तदा किं फलम् ?
६ मीनराशेः पञ्चमपादे जन्मतो तद् किं फलम् ?
७ कः तनुसंस्थे शैशवे व्याधियुक्तोनयनगदसुदुःखी नीचसेवानुरक्तो भवति ?
८ अर्क किं चन्द्रिचन्द्राणां योगे किं फलम् ?
९ सूर्यस्य नैसर्गिकशत्रुग्रहाः के सन्ति ?
१० षड्वर्गे होरालग्नात् किं विचारणीयम् ?
११ रूचकयोगः कदा भवति ?
१२ सूर्यस्य उच्चराश्यंशमानं लिखत ।
१३ वृषभराशौ कानि नक्षत्राणि भवन्ति ?
१४ मेषादिषड्राशीषु यदा सूर्यः भ्रमति तदा कः गोलः भवति ?
१५ भरणीनक्षत्रं कस्मिन् राशौ भवति ?

****